CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust



श्रीगणेशायनमः॥भद्राशांतिप्रयोगः॥आदौगोमुखप्रसवंकृत्वा॥देशकालौसंकीर्त्यअस्य
शिशोःभद्राजननसूचितसकलारिष्टनिरसनद्वाराश्री०र्थंसग्रहमखांगगौरीभद्राज
ननशांतिंकरिष्ये।तत्रादौगणेशपूजनादिआचार्यादिवरणांतंकुर्यात्आचार्यवदत्रे
त्यादि०देवयजनंरक्षस्वास्छंडिलात्पूर्वतः॥हीधोरित्यादिमंत्रावृत्याकलशत्रयंसंस्थाप्य
पूर्णपात्रनिधानांतंकृत्वा॰प्रतिमायाअग्न्युत्तारणंकुर्यात्।मध्यकलशेभद्राअग्नेरिति नेत्र
मंत्रस्यवाध्यश्वःसुमित्रऋषिः॥अग्निर्देवताजगतीछंदः॥भद्रावाहवि०॥ॐभद्राअग्नेर्व० भद्रौ
तू।भद्रायै०भद्रांआ०॥दक्षिणेउत्सूर्यइतिमंत्रस्यमेत्रावरुणिर्वसिष्ठऋषिः॥सूर्यादेवता॥
त्रिष्टुप्छंदः॥सूर्यावा०उत्सूर्यहे०तू।सूर्याय०सूर्य०॥वंसोमइतिमंत्रस्यगौतमऋषिः॥ तदुत्तर
सोमोदेवता॥त्रिष्टुप्छंदः॥सोमावा०वंसोमप्रचि०रा०॥सोमाय०सोमं०॥षोडशोपचारैः धृतः
संपूज्य।मध्यमकलशेअन्वारभ्यभद्राअग्नेरितिसूक्तंजपेत्॥दक्षिणेसंपूर्णसोरंजपेत्॥उ
त्तरेवंसोमप्रचिकितइतिसूक्तंजपेत्॥ततःत्र्यंबकमंत्रं१०८जपेत्।ततःप्रार्थयेत्॥भद्रेभद्र



Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust



१ पदंनित्यंकृपयाणहिमांशिशोः॥तवार्चनेबालकस्यजन्मदोषंव्यपोहतु॥विकन्येनमस्कृत्यं
नमस्तेयोगियोगिनि॥शिशुजन्मोद्भवंदोषंमयाशुजगन्मये॥अज्ञानादथवाज्ञानाद्यत्कृ
तंपूजनंतव॥तेनपुण्यप्रभावेनजन्मदोषंव्यपोहतु॥प्रार्थ्य॥ततःस्थंडिलसंस्कारपूर्वकंअ
ग्निंसंस्थाप्यईशान्यांमहान्संस्थाप्यपूजनंच॥अन्वाधध्यात्॥महान्अग्निदेवताप्रत्यधि
दैवंचाभ्यअमुकसंख्याअमुकद्रव्यैः॥भद्रांप्रतिद्रव्यं१०अभिःचकृतिलाप्रद्रव्यैःसूर्यसो
मंचप्रत्येकंप्रतिद्रव्यं२८भिःतैरेवद्रव्यैः॥शेषेणेत्याहिआज्यभागांतेप्रधानहोमः॥
स्विष्टकृदादिहोमशेषंसमाप्यबलिपूर्णाहुतिंकृत्वा॥अभिषेकः॥समुद्रज्येष्ठा॰क्रु
क्४आपोहिष्ठा॰ऋ२त्र्यंबकं॰१तच्छंयोरावृणीमहइत्याहिउत्तरपूजांकृत्वा॥आचार्या
दीन्संपूज्यआचार्यायप्रतिमादानंदक्षिणादानंच॥ब्राह्मणभोजनसंकल्प्यभूयसीच॥
आज्यावेक्षणंरूपंरूपमितिमंत्रेण॥कर्मेश्वरार्पणंकुर्यात्॥इतिगर्गोक्तभद्राशां
त्ययोगः॥॥संवत्१८५२मितीअश्विनभाद्रपदशुद्ध५सोम्येइदंपुस्तकंकुंटेविनायकभट्टस्य॥ १

Kashi Maharani Collection, Ramnagar Fort, Varanasi